# ময়ূরেশ্বরস্তোত্রম্

{॥ ময়ূরেশ্বরস্তোত্রম্ ॥}

শ্রী গণেশায় নমঃ ।

সর্বে উচুঃ ।

পরব্রহ্মরূপং চিদানন্দরূপং পরেশং সুরেশং গুণাব্ধিং গুণেশম্ ।

গুণাতীতমীশং ময়ূরেশবংদ্যং গণেশং নতাঃ স্মো নতাঃ স্মো নতাঃ স্মঃ ॥ ১॥

জগদ্বন্দ্যমেকং পরাকারমেকং গুণানাং পরং কারণং নির্বিকল্পম্ ।

জগৎপালকং হারকং তারকং তং ময়ূরেশবংদ্যং নতাঃ স্মো নতাঃ স্মঃ ॥ ২॥

মহাদেবসূনুং মহাদৈত্যনাশং মহাপূরুষং সর্বদা বিঘ্ননাশম্ ।

সদা ভক্তপোষং পরং জ্ঞানকোশং ময়ূরেশবংদ্যং নতাঃ স্মো নতাঃ স্মঃ ॥ ৩॥

অনাদিং গুণাদিং সুরাদিং শিবায়া মহাতোষদং সর্বদা সর্ববংদ্যম্ ।

সুরার্যংতকং ভুক্তিমুক্তিপ্রদং তং ময়ূরেশবংদ্যং নতাঃ স্মো নতাঃ স্মঃ ॥ ৪॥

পরং মায়িনং মায়িনামপ্যগম্যং মুনিধ্যেয়মাকাশকল্পং জনেশম্ ।

অসংখ্যাবতারং নিজাজ্ঞাননাশং ময়ূরেশবংদ্যং নতাঃ স্মো নতাঃ স্মঃ ॥ ৫॥

অনেকক্রিয়াকারকং শ্রুত্যগম্যং ত্রয়ীবোধিতানেককর্মাদিবীজম্ ।

ক্রিয়াসিদ্ধিহেতুং সুরেন্দ্রাদিসেব্যং ময়ূরেশবংদ্যং নতাঃ স্মো নতাঃ স্মঃ ॥ ৬॥

মহাকালরূপং নিমেষাদিরূপং কলাকল্পরূপং সদাগম্যরূপম্ ।

জনজ্ঞানহেতুং নৃণাং সিদ্ধিদং তং ময়ূরেশবংদ্যং নতাঃ স্মো নতাঃ স্মঃ ॥ ৭॥

মহেশাদিদেবৈঃ সদা ধ্যেযপাদং সদা রক্ষকং তৎপদানাং হতারিম্ ।

মুদা কামরূপং কৃপাবারিধিং তং ময়ূরেশবংদ্যং নতাঃ স্মো নতাঃ স্মঃ ॥ ৮॥

সদা ভক্তিং নাথে প্রণযপরমানংদসুখদো

যতস্ত্বং লোকানাং পরমকরুণামাশু তনুষে ।

ষড়ূর্মীনাং বেগং সুরবর বিনাশং নয বিভো

ততো ভক্তিঃ শ্লাঘ্যা তব ভজনতোঽনন্যসুখদাত্ ॥ ৯॥

কিমস্মাভিঃ স্তোত্রং সকলসুরতাপালক বিভো

বিধেযং বিশ্বাত্মন্নগণিতগুণানামধিপতে ।

ন সংখ্যাতা ভূমিস্তব গুণগণানাং ত্রিভুবনে

ন রূপাণাং দেব প্রকটয কৃপাং নোঽসুরহতে ॥ ১০॥

ময়ূরেশং নমস্কৃত্য ততো দেবোঽব্রবীচ্চ তান্ ।

য ইদং পঠতে স্তোত্রং স কামান্ লভতেঽখিলান্ ॥ ১১॥

সর্বত্র জযমাপ্নোতি মানমাযুঃ শ্রিযং পরাম্ ।

পুত্রবান্ ধনসম্পন্নো বশ্যতামখিলং নযেত্ ॥ ১২॥

সহস্রাবর্তনাৎকারাগৃহস্থং মোচযেজ্জনম্ ।

নিযুতাবর্তনান্মর্ত্যো সাধ্যং যৎসাধযেৎক্ষণাত্ ॥ ১৩॥

ইতি শ্রীগণেশপুরাণে উত্তরখণ্ডে বালচরিত্রে মযূরেশ্বরস্তোত্রং

সম্পূর্ণম্ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)

and Amith K Nagaraj (amithkn@rediffmail.com)

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Mayureshwara Stotram Lyrics in Bengali PDF
% File name : mayuureshvarastotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : gaNeshapurANa
% Latest update : May 12, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website